**आप्व** पु० आप–वन् । वायौ सि०कौ० कण्ठस्थाने उज्ज्वल० वन्प्रत्ययाधिकारे उणादौ निपा० अदन्तएवायम् । शब्दकल्पद्रुमे नान्तत्वकल्पनं चिन्त्यम् । [वैद्यकम् ।

**आफूक** न० ईषत् फूत्कारइव फेनोऽत्र ष्ट० तलोपः । अफेने

**आबद्ध** न० सम्यक् आबद्धम्+बन्ध–भावे क्त । दृढबन्धने ।१आधारे क्त ।२प्रेम्णि । कर्मणि क्त । ३बद्धे ४आप्ते ५प्रतिरुद्धे च त्रि० । "पयोधिमाबद्धचलज्जलाविलम्" माघः "आबद्धभीमभ्रुकुटीकरालम्" भट्टिः । "स्यन्दनाबद्धदृष्टिषु" रघुः । ६भूषणे च । बा०करणे क्त ।७योक्त्रे ।

**आबन्ध** पु० आ+बन्ध–घञ् । १दृढबन्धे, करणे घञ् । २योक्त्रे आधारे घञ् । ३प्रेम्णि च । ल्युट् आबन्धनमप्यत्र न० ।

**आबर्ह** पु० आ+बर्ह-हिंसायां घञ् । १उत्पाटने २हिंसने च ल्युट् । आबर्हणमप्यत्र न० ।

**आबर्हिन्** त्रि० आबर्होऽस्त्यस्य इनि । उत्पाटनयुक्ते "मूलमस्याबर्हि" पा० आबर्ह आबर्हणं तदस्यास्ति आबर्हि सि०कौ० ।

**आबाध** पु० आ+बाध–घञ् । पीड़ायां "आबाधे" पा० "आबाधे पीड़ायाम्" सि०कौ० "यथासुखमुखः कुर्य्यात् प्राणाबाधभयेषु च" "न चैनं पादतः कुर्य्यान्न प्राणाबाधमाचरेत्" मनुः "तत्र मनःशरीराबाधकराणि शल्यानि" सुश्रु०नास्ति बाधा यस्य । २पीड़ाशून्ये त्रि० ।

**आबाधा** स्त्री आ+बाध–भावे अ । १पीड़ायाम् २तापत्रये क्लेशे च । "आबाधामरणभयार्चिषा चिराय" किरा० लीलावत्युक्ते ३अबाधाशब्दार्थे २२६पृष्ठे विवृतिः ।

**आबिल** त्रि०आ+बिल-भेदने क । १अस्वच्छे कालुष्ययुक्ते अस्वच्छस्य हि जलादेः सम्यग्दृष्टिप्रसारभेदनात्तथात्वम् । "पयोधिमाबद्धचलज्जलाविलम्" माघः । २भेदके त्रि०

**आबिलकन्द** पु० आबिलोभूमेराभेदकः कन्दो मूलमस्य । मालाकन्दे क्षुपभेदे तस्य मालाकारकन्दतया भूमेः सम्यग्भेदनात्तथात्वम् ।

**आबुत्त** पु० आपनमाप् क्विप् आपे प्राप्त्यै उत्तास्यति उद्+तम–ड । नाट्योक्तौ भगिनीपतौ । बहुप्राप्तौ सन्तोषाभावेन दुःखित्वात्तस्य तथात्वम् । [२मेघसम्बन्धिनि च ।

**आब्द** त्रि०अब्दे मेघे भवः तस्येदम् इति वा अण् ।१ मेघभवे

**आभग** पु०सम्यक् भगं माहात्म्यं यस्य । आभाग्यदेवे "सोमोसूत्यावपानेष्ठा भगोदेवोदेवेष्वाभगः" ऋ० १,२६,४

**आभण्डन** न० आ+भण्ड–ल्युट् । निरूपणे शब्दचि० ।

**आभयजात्य** पुंस्त्री अभयजातस्यापत्यं गर्गा० यञ् । अभयजातस्यापत्ये स्त्रियां ङीप् यलोपः । ततः कण्वा० अण् यलोपः । आभयजातः तदपत्ये पुंस्त्री स्त्रियां ङीप्

**आभरण** न० आ+भृ–कर्मणि ल्युट् । भूषणे । "किमित्यपास्याभरणानि यौवने" कुमा० "वेषाभरणसंशुद्धाः स्पृशेयुः सुसमाहिताः" "वाहनानि च सर्वाणि शस्त्राण्याभरणानि च" मनुः "पाण्डवानां सभामध्ये दुर्य्योधन उपागत । तस्मै गाश्च हिरण्यञ्च सर्वाण्याभरणानि च" विदग्धमु० भावे ल्युट् । २सम्यक्पोषणे न० ।

**आभरित** त्रि० आभर आभरणं जातोऽस्य इतच् आ+भृ-बा० इतच् इट् च १पूरिते २अलङ्कृते । "हस्ताभरणपूर्णेन केयूराभरितेन च" हरिवं०१६अ० ।

**आभर्म्मन्** न०आ+भृ+मनिन् । १सम्यग्भरणे गर्भादेः २पोषणे

**आभा** स्त्री आ+भा–अङ् । १दीप्तौ,२शोभायाम् कान्तौ,३उपमाने,आभा "वकुलपर्य्यायः कथितः कोविदैरिह" भा०प्र० उक्ते ४वकुले च । "आभाफलत्रिकैर्व्योषैः सर्वैरेभिः समीकृतैः तुल्यगुग्गुलुरायोज्यो भग्नसन्धिप्रसाधकः" चक्रद० ।

**आभाति** स्त्री आभाति तुल्यरूपतया आ+भा–क्तिच् । प्रतिविम्बे राजनि० । तस्य विम्बतुल्यतया दीप्तेस्तथात्वम् ।

**आभाषण** न० आ+भाष–ल्युट् । परस्परकथने २आलापे "सम्बन्धमाभाषणपूर्व्वमाहुः" रघुः । ३सम्बोधने च ।

**आभाष्य** त्रि० आ+भाष–ण्यत् । आमन्त्रणीये १संबोध्ये २आलाप्ये च "जनमाभाष्यमिमं न मन्यसे" रघुः । आ+भाष–ल्यप् । ३संबोध्येत्यर्थे अव्य० ।

**आभास** पु० आभासते आ+भास अच् । उपाधितुल्यतया भासमाने १प्रतिविम्बे "आभासोरूपसूर्य्यकवत्" शा०सू० 'बुद्धितत्त्विचिदाभासौ द्वावेतौ व्याप्नुतो घटम् । तत्राज्ञानं धिया नश्येदाभासात्तु घटः स्फुरेत्" वेदा०का० । २दुष्टे हेत्वादौ "हेत्वाभासाश्च पञ्चधा" भाषा० । "सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासाः" गौ० सू० । पक्षसत्त्वसपक्षसत्त्वविपक्षासत्त्वाबाधितत्वासत्प्रतिपक्षितत्वोपपन्नोहेतुर्गमकः स इवाभासत इति हेत्वाभासस्तेन तद्भिन्नत्वे सति तद्धर्म्मवत्त्वम् पञ्चरूपोपपन्नत्वाभावे सति तद्रूपेणाभासमानत्वं हेत्वाभासत्वमिति फलितार्थः 'हेत्वाभासाश्च यथोक्ताः" गौ०सू० । एवं प्रमाणाभासः युक्त्याभासः आगमाभासइत्यादावपि प्रामाण्याद्यभाववत्त्वे सति प्रमाणादिरूपेणाभासमानत्वमर्थः । 'एवं बहवो विप्रतिपन्नायुक्तिवाक्यतदाभाससमाश्रयाः सन्तः" शा०भा० ।